# ।। श्रीमार्काण्डेयमहापुराणम् ।।

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

**प्रथमोऽध्यायः**

**पक्षित्वमापाप्सरा-**

जैमिनिना श्रुतेः महेतिहासः जयनामकः, द्रौपद्याः पञ्चपतित्वं, तस्याः पुत्राणां विना विवाहेन मरणम्, इत्यादीन् जिज्ञास्यमानः जगाम जैमिनिर्मार्काण्डेयम् । जैमिनेः प्रश्नान्युत्तरयितुमनवकाशो महामुनिर्मार्कण्डेयः सूचयामास जैमिनिने गन्तुं पक्षिणः सकाशम् । उवाच च पूवृत्तान्तं महाज्ञानिनां तेषां पक्षिणाम् ।

एकदा देवर्षिः नारदः देवसभां सुधर्मां जगाम । अप्सरोगणमध्यस्थेनेन्द्रेण मानितो महर्षिरैच्छत्तासां मध्ये श्रेष्ठगुणवत्याः नर्तनम् । निर्धारयामास च सा गुणवती या सुलभकोपिनः दुर्वाससस्तपोविघटकीति । मुनेः परीक्षार्थं सिद्धा वपुष्मनी ससार च मुनेर्दुर्वाससो वनम् । तत्र मुनेर्मनसः क्षोभणार्थं प्रदर्शयामास देहलावण्यं स्वविलासं च । त्रिकालज्ञानी दुर्वासः शशाप तां वयुष्मतीं 'पक्षी भव' इति ।

द्वितीयोऽध्यायः

सत्यं विधेर्निर्णयः — अरिष्टनेम्न्याः पुत्रः गरुडः । अस्य वंशे जातौ कङ्ककन्धरौ । एकदा कङ्कः कैलासे ददर्श मद्यव्यसनमुन्मत्तं रक्षः नाम्ना विद्युद्रूपम् । स्वस्त्रीमध्यस्थः राक्षोऽक्षिपन् कङ्कम् । एषा नदी, पर्वतोऽयं सर्वं वनं च मदधीनमिति । 'एतत् प्राकृतिकं स्वं नैकस्वाम्यकम्, अत एव नैकस्यैवाधिकारः' इति प्रतिजगाद कङ्कः रक्षः प्रति । कुपितो मनुष्यादः सुलभकोपी कङ्कं खड्गेनाच्छिनत् । करन्धस्तु सोदरस्य कङ्कस्य मरणेन दुःखितः कुपितश्च । पक्षिरूपः करन्धः युद्धे राक्षसमहनत् । मनुष्यादस्य स्त्री करन्धस्य वशाऽभूत् । कामरूपी सा पक्षिरूपाऽभूत्, ततः सा करन्धात् गर्भं दधार । सा त्वप्सरत्स्सु वरण्यायाः मेनकायाः पुत्री । एकदा गर्भिणी सा जगाम युद्धदर्शनार्थं युद्धभूमिं कुरुक्षेत्रम् । तदा भगदत्तार्जुनयोर्तुमलं युद्धं पश्यती सा, रथं भगदत्तीयं समाश्रिता । तदा साऽर्जुनबाणेन हता । तस्याः गर्भात् बहिरागतान्यण्डानि । गर्भात्स्राविताानि तान्यण्डानि दैवादेकस्मात् गजकण्ठात् गलितात् घण्टादावृताबभूवुः । यदृच्छया सशिष्यः शमीकः युद्धभूमिमागतः । घण्टान्तरे पक्षिशावकानां ध्वनिमश्रुणोत् । अनाथान् तान् नीत्वाऽऽश्रमे ररक्ष । उवाच च शमीकः शिष्यान् '' रणे पलायनपरान् दैत्यान् प्रति यदुक्तं उशनसा तत् सत्यं, ' विधिना यदि निश्चितं जीवितं तदा रणेऽपि जीवत्येव, न निश्चितं जीवितं गृहेऽपि मरणं ध्रुवम्'' इति । अनाथान् तान् शावाकान् श्येनबिडालादिभ्यः ररक्ष ।

द्वित्रिंशदधिकशततमोऽध्यायः

भीष्मप्रतिज्ञा — शूद्रतापसेन विदितवृत्तान्तो दमनः कोपेन प्रजज्वाल । 'निष्पापस्य फलाशिनः सकलभूतदयापरस्याशस्त्रस्य अस्मत्पितुः संहारकं निर्घृणं संहरिष्ये । तस्य रक्तात् पितरं तर्पयिष्यामि । शत्रुः दिक्पालैः सिहतोऽभूत्, सर्वे दैत्यदानवैर्वा । तान् सर्वान् निगृह्य शत्रोः शिरसं छेत्स्यामि । यदि विफलोऽहं अग्निं प्रवेक्ष्यामीति प्रतिजज्ञे ।

जघान वपुष्मन्तम् - चतुरङ्गसेनासहितो मदनः ससार वपुष्मन्तम् । सोऽपि दुरहङ्कारी रणमाजगाम । प्रथतः रणे, पदातयः पदातिभिः, रथिका रथिकैः, अश्वारोहाः अश्वारोहिभिः युयुधिरे । वपुष्मतः सेनायाः बहुभागो यमं जगाम, अवशिष्टाः गृहं जग्मुः, अन्ये शरणं जग्मुः । वपुष्मन्तः सप्तमन्त्रिणः मरणमापुः । विरथस्य वपष्मतः शिरः चकर्त पतितस्य रात्रोरूर चखान । तेन रक्तेन पितरं तर्पयामास च ।

चतुःत्रिंशदुत्तरशततमोऽध्यायः

श्रवणफलम् —– क्रोष्टुमार्काण्डयोः संवादरूपं इमं पुराणं न शठाय, न गुरुद्रोहिणे, न मातापित्रोर्निन्दकाय दद्यात्  लोभात्, मोहात्, भयाद्वायोग्याय यदि दद्यात्, सः नरकभाजनो भवति । श्रोतारः वाचकाय गां दद्यात् । सुवर्णं वा दद्यात् । अन्यथा शास्त्रचोराः भवन्ति । श्रवणादस्य पुराणस्य सर्वाणि पापानि नश्यन्ति । अन्तत आप्नुवन्ति परं ब्रह्म । ब्राह्मं, पाद्मं, वैष्णवं, शैवं, नारदीयं, भागवतं मार्कण्डेयं, आग्नेयं, भविष्यं, ब्रह्मवैवर्तं, लैङ्ग्यं, वाराहं, स्कान्दं, वामनं, कौर्मं, मात्स्यं, गारुडं, ब्रह्माण्डं चेति अष्टादशपुराणानि । तेषु सप्तमं मार्काण्डेयम् । सर्गः, प्रतिसर्गः, वंशः, मन्वन्तरं, वंशानुचरितं चेति पुराणस्य पञ्चांशोऽत्रोक्तः । अस्य पुराणस्य श्रवणात्, सुक्षेत्रे पुष्करे गोसहस्रदानेन यत्फलं तत्फलमाप्नोति, वेदाध्ययनेन यत्फलं, तदाप्नोति । पुराणेऽस्मिन् अष्टशतोत्तरषट्सहस्राणि श्लोकाः सन्ति ।

**समाप्तं मार्काण्येयमहापुराणम्**

******